H.S Section Code No - 3

[stamp]

# 1 विस्मर - कारुण्यं अस्माकं कर्तव्यम्

सूर्योदयस्य समयः। पक्षीणाम् कलरवः सर्वत्र श्रूयते। "अहो! प्रातर्कालोऽभवत्, कष्टमेव" इति चिन्तयन् पटगृहात् बहिः आगतवान् योगेश्वरः। योगेश्वरः स्वमित्रम् रमेशं प्रति अवदत् "हे रमेश! पूर्वासन्ध्या प्रवर्तते, उत्तिष्ठ" इति। तदा रमेशः अपि छादकम् ऊर्मि कृत्वा बहिः अगच्छत्। तौ स्नेहितौ चायपानार्थं अगच्छताम्। तदा रमेशः अवदत् - "शैत्यम् असहनीयमेव। अधुना बान्धवानां स्मरणेन व्याकुलः अस्मि। परन्तु किं प्रयोजनं?" इति। "रमेश, व्याकुलो न भव। आवाम् सैनिकौ। देशरक्षणमेव सैनिकाणां लक्ष्यम्। अतः चिन्ता मा कुरु।" इति प्रत्यवदत् योगेश्वरः। तदनन्तरम् तौ सैनिकौ व्यायामे निरतौ अभवताम्, परन्तु योगेश्वरस्य मनसि पत्नी पुत्रीणाम् चिन्ता एव आसीत्। तदा एव गुलिकास्त्राणां रवः सर्वत्र प्रसरितः। सेनाधिपतिः रामदेवः आज्ञा ददाति "हे सैनिकाः, गुलिकास्त्रम् धारयित्वा युद्धाय

सन्नद्धाः भवन्तु" इति । सैनिकाः चिन्ताकुलः समवस्त्रम धारयन अपि तु गुलिकास्त्रम गृहीत्वा पटगृहात बहिः आगतवन्तः । तत्र हिमावृतं प्रदेशम 'सियाचिन' इति प्रसिद्धम भवति । अत्युन्नत पर्वतश्रेणी भवति सियाचिन ।

योगेश्वरः शैत्येन शक्तिहीनः आसीत । किन्तु सः कर्तव्यविमुखो न अभवत । भुशुंडिम हस्ते धारयन सन्नद्धः अभवत । उभयभागे अपि युद्धारम्भः अभवत । सैन्याभ्यां गोलिकानां वृष्टिः अभूत । कतिपयसमयानन्तरम उभयसैन्याभ्याम कदनविरामघोषणमभवत । भारतदेशस्य सैन्ये बहुविध नाशनष्टमभवत । सियाचीन पर्वतश्रेणी रक्तप्रवाहेन निमज्जितमिव आसीत सैनिकानाम हृदये । युद्धे भग्न देहानां, मृतानाञ्च शरीरं दृष्ट्वा योगेश्वरः दुःख सागरे अपतत । तदैव स्वमित्रस्य स्मरणम आयाति । "अहो ! रमेशः कुत्र ?" इति इतर सैनिकेषु अपृच्छत । योगेश्वरः किन्तु सः यत्रकुत्रापि नास्ति । तदा रामदेवः

'चिन्ता मा कुरु । सः युद्धे अस्माकं देशार्थं साहाय्यं कृत्वा हुतात्मः " अभवत् " - इति अति दुःखेन अवदत् । योगेश्वरस्य नेत्राभ्यां अश्रूणि आविसरन् । " हन्त .... हन्त ! किमर्थं ....? हे रमेशः किमर्थं त्वं निद्रां करोति ? युद्धाय मे साकं आगच्छतु" इति योगेश्वरः विललाप ।

तदा सैनिकेषु एकः अवदत् - " अद्य एव रमेशस्य पत्न्याः पत्रम् लब्धमभवत् । किन्तु पत्रम् पठितुम् रमेशः नास्ति इति योगेश्वराय पत्रं अददात् । योगेश्वरः पत्रम् अपठत् ।

' आर्यपुत्र !

भवान् तत्र निद्राहीनः सन् प्रतिदिनं देशरक्षणम् करोति । वयम् अत्र अति सुखिनः भूत्वा चिन्तां विहाय वासं कुर्मः । तुभ्यम् अस्माकं स्मरणम् आगच्छति न ? वयं तु त्वाम् दर्शनार्थं उत्सुकाः ! ~~सखा~~ कर्मरहितादिनानि नास्ति वा ? नास्ति चेत् चिन्ता अपि नास्ति । देशरक्षणमेव सैनिकादीनां ध्येयं वर्तते ।

तत्र त्वम् देशद्रोहीणाम् , उग्राणाञ्च नाशं कुरु। तव यशासि वयं प्रार्थयामः । अपि तु 'कारुण्यं परमो धर्मः' इति वचनं न विस्मर । उग्राणां मनः परिवर्तनाय यत्नं कुरु ।

इति ,

सप्रेमं पत्नी , '

पत्रमिदम् पठित्वा योगेश्वरः भूमौ अपतत् । "अधुना किं करणीयम् ? कथम् तस्य पत्नीं मरणवार्तां वदामः ?" इति विलापः पर्वतश्रेण्यां प्रसारितः । रामदेवः प्रत्यवदत् -"कण्टकाय कण्टकं दाव मार्गम् अर्थात् नाशाय प्रतिनाशः" इति ।

सैनिकाः कदनविरामोल्लङ्घनं कर्तुं उद्युक्ताः आसन् । योगेश्वरः तु स्वसोदितनाय प्राणं दातुं अपि सिद्धः आसीत् । अचिरादेव योगेश्वरस्य भुषुण्ड्यात् गोलिकाः विरुद्धे भागे अगच्छन् । किन्तु तत्रस्थः सैनिकाः युद्धाय सिद्धाः नासन् । इत्यतः भारतीयाः विजयस्योपरि तुष्टाः अभवन् ।

विरुद्ध पक्षे सैनिकाः भग्न आशा अभवन्। अनन्तसैनिकाः हताः अभवन्। योगेश्वरस्य नेत्रौ अग्निरिव ज्वलन्तौ आस्ताम्। वारम् वारं तस्य कर्णे 'कारुण्यो परमो धर्मः' इति रमेशस्य पत्नीवचनं प्रतिध्वनिः अजात। योगेश्वरः सैनिकाभ्यां साकं गुल्मे उपविश्य सिंहरिव मृगयार्थं गोलिकास्त्रम् गृहीत्वा आलोचनं करोति स्म। 'अद्य शत्रुसंख्या न्यूना जाता। रमेशस्य मरणस्य कारणकर्तारः लभति चेत् तस्य हत्यां करणीयं वा? या रमेशस्य पत्नीवचनम् पालनीयं वा?' इति सः चिन्तयति स्म।

तदैव एकः बालकः रज्जुः हस्ते निक्षिप्य आगतवान्, किम्!? ~~व वर्ष~~ 'षोडश वर्षाणां बालकः अत्र आगतः?' इति भवेत्। किमर्थं सः अत्र आगतः? इति विचिन्त्य योगेश्वरः तस्य बन्धनं कृत्वा सैनिकैः सार्धम् शिबिरस्थलं प्रति गच्छति। अनन्तरं योगेश्वरः बालकं प्रति अपृच्छत् - "भवान् कुतः आगच्छसि? ~~आगमन~~ आगमनकारणं किम्?" इति। बालकः किमपि न अवदत्। तदा

योगेश्वरः प्रहारम् कृत्वा पुनरपि बालकं अपृच्छत्, बहुसमयानन्तरं स्वल्पं दण्डनेन भीतः सः बालकः हृदयविद्रावकम् विषयम् अवदत् । षोडशवर्षाणां बालकः सः, तेनैव रमेशः दिवङ्गतवान् । विषयमिदं ज्ञात्वा योगेश्वरः राक्षसः इव क्रुद्धः भूत्वा तं बालकं केशेन गृहीत्वा आर्भटिं अकरोत् - "हे दुष्ट ! तेनैव मम स्नेहितः मृतः जातः । अतः तव शिरच्छेदनं करणीयं " इति । वचनमिदं श्रुत्वा बालकः रुदन् अवदत् - " सहोदर ! क्षम्यतां । पित्रादीनां चित्रहिंसा असहनीयमासीत् । अतः तादृ कुकर्म कर्तुं सिद्धोभवत् अहं । अधुना मम पश्चात्तापं अस्ति । जीवदानं कुरु " इति सः बालकः योगेश्वरस्य पादधूलीं अश्रुभ्यां मार्जनमकरोत् ।

तदा योगेश्वरः शान्तसागरे सन् ' कारुण्यं परमो धर्मः ' इति वचनं स्मृत्य अवदत् - " सहोदर ! अद्याहं मित्रहीनः अस्मि । मम मनांसि प्रतिकारः प्रज्वलति । किन्तु त्वम् बालकः एव । त्वं किमपि न जानाति इत्यतः जीवदानं करोमि , परन्तु त्वं भारतदेशार्थं सेवाम् करोमि इति प्रतिज्ञां कुरु " इति ।

तदा बालकः प्रतिज्ञां अकरोत् - " अहं अधुना भारतीयपौरत्वं स्वीकृत्य प्रतिदिनं देशसेवां करोमि मे जीवदानं कृतानां सहोदराणां साहाय्यं करोमि । देशद्रोहीकार्यं न करोमि । भारतीयानां पादधूलिं सम्मार्ज्य प्रायश्चित्तं करोमि । एतद् सूर्यचन्द्रौ इव सत्यम् ।" प्रतिज्ञां श्रुत्वा योगेश्वरः बालकस्य आलिङ्गनमकरोत् । योगेश्वरः, बालकः, सैनिकः च आनन्दबाष्पं भूमौ निक्षिप्य सन्तुष्टाः अभवन् । रमेशः तु देवलोके स्वर्गे 'कारुण्यं परमो धर्मः' इत्युक्त्वा हसन्नासीत् । तथापि आकाशात् वृष्टिरासीत् । अवतान्य -

कारुण्यं परमो धर्मः
इति वचनं पालयामः ।
देशसेवां सदा कुर्मः
स्वर्गसुखमेव प्राप्नुयामः ॥

कारुण्यं अस्माकं कर्तव्यं
मा विस्मर भूत सूक्तिम् ।
परस्परसेवा विनिमयार्थं
जीवकारुण्यमेव सहायकम् ॥